**सम्पादकः - मलयपोडे**

**आलङ्कारिकः - तथागतमण्डलः, नेपालदासः, शुभदीपपालः**

# सूचीपत्रम्


**माया** — **अनुवादकः- कार्त्तिक-मण्डलः**

(मूलम् - श्रीमद्विवेकानन्दस्वामिपादानां ज्ञानयोगः)

अद्यत्वे संस्कृतम् — कृष्णगोपालपात्रः

अभ्यर्थनस्य प्रतिवचनम् — अनुवादकः- मलय पोडे

(विवेकानन्दस्वामिनां शिकागोभाषणम्)

प्रार्थना — तपनदासः

विवेकपञ्चकम् — आवीरलालगङ्गोपाध्यायः

श्रद्धाविवेश, सोऽमन्यत — सुप्रियगोस्वामी

# माया

## (मूलम् - श्रीमद्विवेकानन्दस्वामिपादानां ज्ञानयोगः)

## अनुवादकः- कार्त्तिक-मण्डलः, समन्वित-एम-ए-कक्षायां तृतीयवर्षीयः

एकदा नारदः श्रीकृष्णं पृष्टवान् - 'हे भगवन्, माया का? मनुष्याणां जीवने माया कथम् आगच्छति?' तस्मिन् समये श्रीकृष्णः किमपि न प्रत्युत्तरितवान्। एवं कानिचन दिनानि गतानि। एकस्मिन् दिने श्रीकृष्णेन सह नारदः भ्रमणाय अरण्यं गतः। कृष्णः किञ्चिद् दूरं पर्यट्य नारदम् उक्तवान्- नारद, अहं तृष्णार्तः अस्मि। मदर्थं किञ्चिज्जलमानेतुं शक्नोषि वा? इति। नारदः तम् उक्तवान्- 'भगवन्, भवान् क्षणकालम् अत्रैव तिष्ठतु, अहं जलमानयामि'। ततः किञ्चिद्दूरे एव एको ग्राम आसीत्। नारदः जलानयनाय तं ग्रामं गतः। तत्र गत्वा नारदः एकस्य  गृहस्य द्वारमुपागतः। द्वारे स्थितः स गृहस्थम् आहूतवान्। तदा एका सुन्दरी कन्यका गृहाद् बहिरागतवती। तां कन्यां दृष्ट्वा नारदः तस्याः सौन्दर्येण मुग्धः। कन्यकारूपमुग्धः सः अरण्ये स्थितं तृष्णार्तं श्रीकृष्णमपि विस्मृतवान्। स तया कन्यकया सह वार्तालापम् आरब्धवान्। पुनस्तस्मिन् दिवसे स तां कन्यकां प्रति समागतः। तयोर्मध्ये प्रेम समुत्पन्नम्। नारदः तां परिणेतुकामः तस्याः पितरम् अभ्युपागच्छत्। पितृसकाशात् स कन्यां स्वपत्नीत्वेन प्रार्थितवान्। कन्यायाः पिता सानन्दं सम्मतिं प्रायच्छत्। ततः नारदः तां परिणिनाय। विवाहानन्तरं तस्य त्रयः पुत्राः समुत्पन्नाः। एवं सुखमयजीवनयापनेन नारदस्य द्वादशवर्षाणि गतानि। तस्य श्वशुरस्य मृत्योः परं स एव भूम्यादिसम्पदां स्वामी संवृत्तः। स आत्मानं सुखिनं मन्यते स्म। एकदा तस्मिन् ग्रामे वृष्टिकारणात् नद्यां प्लावनं संवृत्तम्। तेन सम्पूर्णो ग्रामो जलमग्नः। बहवः ग्रामवास्तव्या मनुष्याः पशवश्च मृताः। नारदस्य गृहमपि जलमग्नम्। तदा स स्वपरिजनं रक्षितुकामः हस्तेन एकेन स्वपत्नीं, अपरेण च पुत्रद्वयम्, स्कन्धयोः चापरं पुत्रं धृत्वा नदीम् अतिक्रम्य ग्रामान्तरं गन्तुं प्रायतत। यदा नद्याः मध्यभागं ते आगताः तदा विपुलजलप्रवाहेण तस्य स्कन्धस्थः पुत्रः जले पतितः। तदा नारदेन क्रन्दनं प्रारब्धम्। तस्य पुत्रस्य संरक्षणाय

यदा स उद्युक्तस्तदा एकस्य हस्तस्य बन्धनम् उन्मुक्तम्। तेन तस्य पुत्रद्वयं जलमग्नम्। अन्तिमे नारदः निजाखिलशक्त्या पत्नीं रक्षितुं प्रायतत, परन्तु विपुलवारिस्रोतसा सा अपि जलमग्ना। जलवेगेन स तीरान्तरे निक्षिप्तः। तत्र स्वापत्यपत्नीवियोगेन महति दुःखे निमग्नो नारदः क्रन्दनं करोति स्म। क्रन्दनसमये पश्चादेकः गम्भीरस्वरः श्रुतः- 'वत्स, जलं कुत्र? अत्र आगतस्य तव सार्धैकहोरा अतीता।' इति। नारदः सविस्मयम् अचिन्तयत्- 'सार्धैकहोरा! अहं तु द्वादश वर्षाणि यापितवान्' इति। तदा कृष्णः हसन् प्रोवाच- 'एषैव माया' इति।

# अद्यत्वे संस्कृतम्

## लेखकः- कृष्णगोपालपात्रः, समन्वित-एम-ए-कक्षायां तृतीयवर्षीयः

धरण्याम् अनन्तप्रकारकाः प्राणिनः निवसन्ति। सर्वेषु प्राणिषु केवलं मनुष्या एव स्वभावं वाचा प्रकटयितुं समर्थाः। स्वमनोभावप्रकाशनस्य माध्यममेव भाषा इत्युच्यते। भाषा नाम व्यक्ता वाक्। विश्वेऽस्मिन् अनेकाः भाषाः सन्ति। परन्तु सर्वासु अपि भाषासु संस्कृतभाषा प्राचीना। संस्कृतभाषा किञ्चित् क्लिष्टा इति जनाः मन्यन्ते, किन्तु वास्तविकी स्थितिर्न तथा। समासामपि भाषाणां मातृस्वरूपिणी इयं संस्कृतभाषा अतीव सरला, सरसा, सुमधुरा च।

भाषावर्गेषु इयं भाषा अत्यन्तं महत्त्वपूर्णा। इयमेव भाषा न केवलं भारतीयानाम्, अपि तु चीन-मङ्गोलिया-जापान-कोरिया-श्रीलङ्का-मलयद्वीपप्रभृतिवासिनामपि इतिवृत्तं सुरक्षितरूपेण सुष्ठु धारयति। देवानां भाषेयम् इत्यपि उच्यते। संस्कृतस्य सरसतां सरलतां च वीक्ष्य विलियम्जोन्स्-गेटे-प्रभृतयः पाश्चात्यविद्वांसः अतीव मुग्धाः। भाषाया अस्या देवभाषात्वे प्रमाणं तावत्-

"अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।
देवभोग्यमिदं यस्माद् देवभाषेति कथ्यते॥" इति।

भारतवर्षे राजनीत्यायुर्वेदगणितज्योतिषज्यामितिमन्त्रतन्त्रकामकलाप्रभृतिविषयाणां बीजं तु संस्कृते एव निहितमस्ति। साहित्यस्यापि मूलं संस्कृतसाहित्यमेव। तत्र सर्वाण्यपि तत्त्वानि बहु विस्तृततया प्रतिपादितानि। भारतीयानां जीवने प्रायः सर्वमपि संस्कृतमूलमेव दृश्यते। तस्माद् उच्यते यत् "संस्कृतं संस्कृतिश्च भारतं रक्षति।" इति।

परन्तु अद्यत्वे संस्कृतस्य स्थितिः तथा उत्कृष्टा नास्ति। बाल्यावस्थायां मात्रा पालिताः पुत्रा इदानीन्तनकाले यथा बार्धक्ये स्वमातरम् एव त्यजन्ति तथैव भारतीयाः अपि इदानीं तेषां संस्कृतमातरं त्यक्तवन्तः, तस्याः अवमाननं च कृतवन्तः। प्रायः सर्वेषु देशेषु इदं दृश्यते यत् तत्रत्याः जना आदौ स्वभाषायाः उन्नत्यै प्रयतन्ते।

परन्तु अत्रास्मिन् भारतवर्षे यथा आङ्गलभाषायाः महत्त्वं, न तथा संस्कृतस्य। तेषामेव ऋषीणां वयं वंशजाः वा? येषां चिन्तने मनने राजते स्म संस्कृतम्। तत्र तत्र शिक्षाप्रतिष्ठानेषु इतरेषां विषयाणां महती आलोचना भवति, परन्तु न तथा संस्कृतस्य। येयं भारतभूमिः ऋषीणां प्राणस्थलं तत्रैव अस्याः तथा स्थानमधुना न दृश्यते। जर्मन्प्रभृतिभाषाणाम् अपि तृतीयभाषात्वेन स्वीकारे नास्ति क्लेशः, या तु एका वैदेशिकी भाषा। परन्तु संस्कृतस्य तृतीयभाषात्वेन स्वीकारे सति केषाञ्चित् विद्वत्प्रवराणां मनसि प्रश्न उदेतीति अहो महतः खेदस्यायं विषयः!

# अभ्यर्थनस्य प्रतिवचनम्

## (विवेकानन्दस्वामिनां शिकागोभाषणम्)

## अनुवादकः- मलय पोडे, एम्-फिल्-कक्षायामधीयानः

हे अमेरिकावासिनो भगिन्यो भ्रातरश्च। यद् आन्तरिकं सादरं च अभिनन्दनं भवद्भिः अस्माकं विहितं, तस्य प्रत्युत्तरप्रदानाय समुत्थितस्य मे हृदयम् अव्यक्तेन मोदेन भवति परिपूर्णम्। पृथिव्या अतिपुरातनस्य न्यासिसमाजस्य पक्षतः अहं भवद्भ्यः साधुवादान् ज्ञापयामि। धर्माणां जनन्याः पक्षतः अहं भवद्भ्यो धन्यवादान् व्याहरामि। समस्तवर्गसम्प्रदायान्तर्गतानाम् अगणितानां हिन्दुधर्मावलम्बिनां जनानां पक्षतः अहं भवद्भ्यः कार्तज्ञ्यं विनिवेदयामि।

अस्यां सभायां मम धन्यवादाः पुनश्च तान् वाचकान् प्रत्यपि, ये प्राच्यदेशीयानां प्रतिनिधीनां विषये भवतां पुरतः प्रावोचन् यद् 'बहुदूरदेशवासिनो जातिसमूहाद् ये अत्र समागताः, तेऽपि विभिन्नेषु देशेषु परमतसहिष्णुताभावप्रचारप्रार्थनां विधातुं शक्नुयुः' इति। यो धर्मो जनान् परधर्मसहिष्णुतां सर्वविधमतस्वीकृतिं च शिक्षयन् अस्ति, तद्धर्मान्तर्गतः सन् अहं गर्वितोऽस्मि। न केवलं वयं सर्वधर्मसहिष्णुतां विश्वसिमः, अपि तु वयं सत्यरूपेण सर्वान् धर्मान् स्वीकुर्मः। अहं तज्जात्यन्तर्गतः सन् गर्वितोऽस्मि, या जातिः पृथिव्याः समस्तधर्मस्य समस्तजातेश्च निपीडितेभ्यो जनेभ्यस्तथा शरणार्थिभ्य आश्रयं दत्तवती। एतद् वक्तुम् अहमात्मानं गौरवान्वितं मन्ये यद् वयमेव इहुदीजातेः अवशिष्टेभ्यो वंशधरेभ्य आश्रयं दत्तवन्तः। रोमवासिनाम् अत्याचारेण यस्मिन् वत्सरे तेषां मन्दिराणि भग्नानि, तस्मिन्नेव वत्सरे अस्मासु आश्रयलाभाय ते दक्षिणभारतम् आगताः। जराथुष्ट्रमतावलम्बिनां पारसिकजातीनाम् अवशिष्टेभ्यो यो धर्म आश्रयं दत्तवान्, पुनश्च अधुनापि तान् पालयति, तद्धर्मान्तर्गतः सन्नहं गर्वान्वितोऽस्मि। प्रतिदिनं यत् स्तोत्रं जना गायन्ति, यत्स्तोत्रमहं शैशवाद् गायामि, तस्मात् स्तोत्रात् काश्चन पङ्क्तयः अहं भवतां समक्षम् उद्धरामि-

"रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥" इति।

एतावत् पर्यन्तं याः सभाः पृथिव्यां समायोजिताः तासु अन्यतमा श्रेष्ठा सभेयं स्वयमेव तस्यापूर्वोपदेशस्य सत्यतां प्रतिपादयति, य उपदेशः प्रदत्तो गीतायां-

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥" इति।

साम्प्रदायिकता स्वमतासक्तिस्तथा तयोर्दुष्परिणामरूपा धर्मोन्मत्तता बहुकालम् एतां सुन्दरीं पृथिवीम् अधिचक्रुः। एताः पृथिवीं हिंसापरिपूर्णां विहितवत्यः, भूयो भूय एतां नरशोणितसिक्तां चक्रुः, सभ्यतां नाशयामासुस्तथा निखिलं जातिसमूहं नैराश्यमग्नं चक्रुः। एताः पिशाचरूपाश्चेत् नास्थास्यन् तर्हि मानवसभ्यता अधुना यथास्ति ततोऽप्यधिका अग्रेसरा अभविष्यत्। परन्तु तासां मृत्यकालः समासन्नः। अहं सोत्साहम् आशासे यद् अस्या धर्ममहासभायाः सम्मानाय प्रातः या घण्टा निनादिता सा एव समग्राया धर्मोन्मत्तायाः, असिना लेखन्या च विहितस्य निखिलस्य अत्याचारस्य तथा एकं लक्ष्यं प्रत्यग्रेसराणां मनुजानां मध्ये सर्वविधानाम् असद्भावानां मृत्युघण्टास्वरूपा।

## प्रार्थना

### तपन-दासः, समन्वित-एम.ए.कक्षायां पञ्चमवर्षीयः

हे प्रभो! तव गहनवनरूपेऽस्मिन् भुवने दिग्भ्रान्त इव कश्चित् संसारी अहमस्मि। अरण्यप्रकृत्याः सौन्दर्यम् उपभुज्य तुष्टं मे मनः। अधुना अस्मात् संसारारण्यात् बहिः गमनाय बहु यते। परन्तु कथञ्चिदपि मार्गो नैव उपलभ्यते। अज्ञाते अरण्यपथि देहरथं बहु चालयित्वा अद्याहं बहु श्रान्तोऽस्मि। श्रान्तिशमनाय उपयुक्तः आश्रयः अपेक्ष्यते। परन्तु शुष्कबालुमयमरौ जलान्वेषणमिव संसारे आश्रयान्वेषणं व्यर्थः प्रयास एव इति जानामि। मायाकार्यें अस्मिन् संसारे सुखान्वेषणं बहु कृतं, प्राप्तञ्च किञ्चित्। किन्तु अधुना तत्सर्वं सुखाभासमिव भाति। आत्यन्तिकं सुखं तन्न। यतो हि मनसः तुष्टिः न जायते। इयमेव दशा ममाद्य।

अथवा भवरत्नाकरे अतिमूल्यमणिमुक्तान् आहर्तुम् उद्युक्तः अहमासम्। तत्प्राप्ते दुःखम् अन्तं भविष्यति इति मत्वा सैन्धववारि च बहु पीतवान्। अज्ञानान्ध एव अहमासम्। यदा किञ्चित् ज्ञानं जातं, दृष्टं यत् भवसागरस्य आवर्त्ते एव पतितोऽस्मि। आवर्त्तादावर्त्तान्तरञ्च गच्छामि, दुःखं न निर्गच्छति। सैन्धववारि पीत्वा शरीरं मे जीर्णं जातम्। अधुना तन्न मह्यं सह्यते।

माया अस्माभिः सह प्रत्यहं क्रीडां करोति। जीवनधारणरूपक्रीडायां प्रतिवारञ्च अस्मान् पराजयते। एकवारं तां पराजेतुं मम महती इच्छा वर्तते। कर्मणः भारः शिरसि बहु धृतः। शीर्णं च मे शरीरम्। इतोऽपि तन्नैव शक्यते। तथापि काषायवेशं धृत्वा संसारञ्च परित्यज्य अरण्ये गुहायां क्वचिदन्यत्र वा ध्यातुं न शक्नोमि। यतो हि गृहे मम मातापितरौ भार्या पुत्रादयश्च सन्ति। स्वकर्तव्यं विस्मृत्य तान् परित्यक्तुं न शक्नोमि। तस्मात् तत्रैव लग्नं मे मनः। एवं स्थितौ किंकर्तव्यविमूढो जातोऽस्मि। बहु जटिला मम मानसिकी स्थितिः।

हे प्रभो! तस्मात् त्वमेव शरणमधुना मम। त्वमेव गतिर्मम। मम उपरि तव कृपा कदापि भविता वा? तव कृपा भवेत् चेत् अत्रैव संसारे भूत्वा मायां पराजेतुं

शक्नोमि। तव पादपद्मे आश्रयं किं न प्राप्नोमि? तव पवित्रचरणस्पर्शेण मामपवित्रं पवित्रीकुरु। मुच्यतां मम कर्मबन्धनम्। शमय मम मानसिकं सन्तापम्। उद्धर माम् अस्मात् घोररूपात् संसारात् । वर्षय तव आशीः इति मम प्रार्थना।

देहि पदतले स्थानं मुञ्च मे कर्मबन्धनम्।
मुक्तं कुरु च मां मूढं सततमिति प्रार्थये॥

# विवेकपञ्चकम्

## लेखकः- आवीरलालगङ्गोपाध्यायः, समन्वित-एम्-ए-कक्षायां द्वितीयवर्षीयः

योो गुरोर्वचनसुस्थिरः सदा
    नैव नैव भवति क्षणे च्युतः।
भूमिरस्तु निजकक्षविच्युता
    तं भजे भुवनविभ्रमान्तकम्॥ १ ॥
वज्रमुष्टिपतनेन बोधिताः
    पादयुग्मरमणप्रबोधिताः।
जन्मभूमिसहजास्तमोवृता
    वातनीतमलिनाः सदा यथा॥ २ ॥
कल्मषान्धदृश एव ते किल
    भारताश्च निजगर्वविच्युताः।
जाह्नवीयविमलाम्बुनिर्मलान्
    साधयत्यमृततोयधारणः॥ ३ ॥
तत्सुभावमननेन सन्ततं
    नेतिभावगमनं स्वतः स्फुटम्।
भानुभासगतचन्द्रमा यथा
    तं भजे भुवनतामसान्तकम्॥ ४ ॥
यः शौद्धोदनिमानसेन च समं न्यासेन वै शूलिनो
मायामुक्तचरित्रयुक्तशुकवच्छीलेन यत्युत्तमः।
यो वाचंयमवेदवैज्ञ्यसहितो विश्वस्य निर्लोडनं
चक्रे ब्रह्मविदं नमामि परमं वीरं च वीरेश्वरम्॥ ५ ॥

## श्रद्धाविवेश, सोऽमन्यत

## सुप्रियगोस्वामी, समन्वित-एम्-ए-कक्षायां तृतीयवर्षीयः

विवेकानन्दस्वामिचरणाः हतगौरवस्य भारतवर्षस्य पुनः स्वे महिम्नि प्रतिष्ठायै संस्कृतशिक्षाया महती आवश्यकतास्तीति बहुधा प्रोक्तवन्तः। किमर्थमिति चेद् भारतवर्षस्य दुर्दशायाः कारणत्वेन तेन उक्तं यद् भारतीयानां स्वसंस्कृतिविषये हीनभावना तथा पाश्चात्यसंस्कृतिं प्रति पूर्णश्रद्धा एव अस्माकं गौरवविनाशस्य मूलम्। अतः सा हीनभावना यथा दूरीभवेत् अस्माकमात्मश्रद्धा च यथा वर्धेत तदर्थमेव संस्कृतपठनस्य उपयोगिता स्वामिभिरुक्ता। कीदृशं संस्कृतं तैः इष्टं कीदृशं च अस्माभिः सेव्यमानमस्ति, पुनश्च तेन संस्कृतेन अस्माकमात्मश्रद्धा पुनर्जागरिता भवति वेति विषये स्वमतं किञ्चिद् अभिव्यज्यते। पाश्चात्यप्रभावेण वयमिदानीं सर्वेऽपि परमुखापेक्षिणः परानुकरणरताश्च सम्पन्नाः। अस्माकं वस्त्रेषु, गीतेषु, चलच्चित्रेषु, आहारादिषु सर्वत्रैव पाश्चात्यसंस्कृतिः परिलक्षिता भवति। स्वबुद्धिबलेषु विश्वासं परित्यज्य परवृत्तिस्वीकरणे एव वयम् अधिकं गौरवं मन्यामहे। तादृशमेव कञ्चन स्वशिष्यं शरच्चन्द्रचक्रवर्तिनं स्वामिपादा अध्यापनरूपायाः आङ्गलवृत्तेः परित्यागेन स्वबुद्धिकौशलेन वाणिज्याय प्रोत्साहितवन्तः। यतो हि तेन परनिर्भरता अपगता स्यात्, अपि च आत्मश्रद्धा वर्धिता स्यात्। सा च आत्मश्रद्धा अस्माभिः संस्कृतभाषाध्ययनेन सनातनसंस्कृतेः ज्ञानेनैव सम्पादनीया, तस्मादेव संस्कृतमध्येयम्। उक्तं हि स्वामिवर्यैः- 'भारतवर्षे सम्मानं संस्कृतं च सहगामिनी, यावदधिगता सुरभारती तावत् न कश्चन उत्सहते त्वां प्रतिकूलयितुम्। एतदेव रहस्यम्, एतदेव शरणम्' इति। इदानीमत्रावधेयं कीदृशस्य संस्कृतस्य चर्चा सम्प्रति प्रचलति भारते येन संस्कृतच्छात्राणामेव अधिका हीनभावना दृश्यते। अध्येतारः संस्कृतपठने अनुत्साहिताः, पठित्वा च अग्रे अध्यापनरूपा वृत्तिरेव सम्पादनीया इति चिन्तायां च आबद्धाः। कथमिति चेद् अस्माभिः न्यायसाहित्यादिशास्त्रेषु एव अधिकं कालयापनं क्रियते तेषामेव प्रचारः प्रसारश्च क्रियमाणोऽस्ति। एतेषां शास्त्राणाम् अद्यत्वे

सामाजिकक्षेत्रेषु तथा प्रयोजनं नाङ्गीकुर्वन्ति अर्वाचीना विद्वांसः। यतो हि एतद्विषयपरित्यागेनापि लक्षाधिका जना जीवनं यापयन्ति एव। ते एतेषां प्रयोजनं नानुभवन्ति। संस्कृतभाषायां निहितमस्ति महत् नैतिकं मौलिकं च तत्त्वं, येषां च अभावेन समाजस्य ईदृशी हीनदशा संवृत्ता। सर्वत्रैव चौर्यं, विश्वासघातकत्वम्, ईर्ष्या, द्वेषः, सर्वतोव्यापी नेतिभावः इत्यादयः अपगुणाः कृष्णमेघा इव समाजनभसि व्याप्ताः। तेषां च परिहारोपायः संस्कृतवाङ्मये सुभाषितादिषु उपनिषत्सु गीतादिषु सहजलभ्यः, परन्तु एते विषयाः अस्माभिः तथा न चर्च्यन्ते। एतादृशतत्त्वानां ज्ञानेन स्वजीवने तेषां प्रयोगेण च संस्कृतभाषा सर्वोपकारिणीत्वम् अधिगच्छति। साधारणजनैः संस्कृताध्ययनस्य प्रयोजनं नाम किमन्यत्।

अपरश्च विषयः, इदानीन्तने काले प्रायोगिकविषयाणामेव अधिकः आदरः क्रियते जनैः। स्वामी विवेकानन्दः अपि भारतीयान् प्रति प्रोक्तवान्- 'एकां सूचीं निर्मातुमपि अशक्या यूयम् आङ्गलजनानां निन्दां कुरुथ, आदौ तेषां पादयोः पतित्वा जीवनसंग्रामोपयोगिनीं विद्यां जानीथ अनन्तरं स्वशास्त्राभिमानित्वं च प्रकाशयथ' इति। योग्यानां सर्वत्रैव आदरः सम्भवति। एवं काचिद् विद्या अधिगन्तव्या यस्याः प्रयोगः परवर्तिनि काले अस्माभिः कर्तुं शक्येत। परन्तु संस्कृतज्ञो नाम केवलं वैयाकरणः, नैयायिकः, मीमांसकः, वेदान्ती इत्येव भवेदिति आस्माकी शिक्षाव्यवस्था अस्मान् शिक्षयति। संस्कृतप्रपञ्चे ये विषयाः प्रायोगिकाः यथा ज्योतिषम्, आयुर्वेदः इत्यादयः छात्रैः न तथा पाठ्यक्रमेषु उपलभ्यन्ते। बहवो विषयाः सन्ति येषामद्यापि समुद्धारो न जातः, कैश्चिदपि न ज्ञायते यत् कीदृशः रत्नभाण्डारः अस्माकं कृते अपेक्ष्यमाणः अस्ति। तस्मिन् विषये छात्राणां महान् आग्रहो न वर्तते, यतो हि शिक्षापद्धतिरस्मदर्थं तथा चिन्तनाय अवकाशं न कल्पयति। एवं केषुचित् विषयेषु अस्माभिर्दृष्टिः इतोऽपि समावेशनीया येन विवेकानन्दस्वामिचरणानां नये वयमात्मश्रद्धावन्तो भवेम, अस्माकं हीनभावना च दूरीभवेदिति शिवम्।